**अञ्चल** ( añcala ) *m. n.* **1i** (end of) a woman's garment अञ्चले गृहीत्वा Mrcch. 4. 17 (3); 10. 57 (7); प्रविधेयमञ्चलेन प्रस्फोटनमङ्घ्रियुगलस्य KuttaMa. 139; विमुञ्च ममाञ्चलम् S'rṅgāTi.(Ru.) 1. 51; SaduktiKa. 71. 14; दुकूलस्याञ्चले धारयामि ViddhaS'ā. 1. 18; अञ्चलगलज्जलबिन्दुना दिव्यांशुकपटेन स्तनतटावरणाय गात्रिकां बद्धुमारब्धवती TilaMañ. 338. 7; सा ··· औत्सुक्यत्वरिता वेद नाञ्चलं पतितं स्वकम् GaneP. ii. 72. 2; इत्यञ्चलासक्तलतो न याच्ञामस्याः करोतीव स कर्णिकारः NavaSāC. 14. 60; स्वेनाञ्चलेनादरादुन्मृष्टम्···रजः SaraKanthā. 610. 12; उत्तरीयवल्कलस्यैव मृदुनाञ्चलेन मुखाम्भोजमपमृज्य (तपस्विनीकन्या) जगाद UdayKa. 90. 9; आयाते दयिते मरुस्थलभुवामुल्लङ्घ्य दुर्लङ्घ्यतां गेहिन्या···स्वेनाञ्चलेनादरादामृष्टं करभस्य केशरसटाभारावलग्नं रजः SubhāRaK. 17. 48; कान्तेनाथ प्रणयमधुरं किंचिदाचञ्चलेन श्रान्ता श्रान्ता जनकतनया वल्कलस्याञ्चलेन PrasaRā. 5. 28; काश्चिदप्यञ्चलान् पाणिपद्मैश्चपललोचनाः···चलयामासुः TrisaS'aPuC. i. 3. 46; त्रिदशयुवतयोऽप्यञ्चलैरंशुकानां चक्षूंषि छादयन्त्यो दिवि दयिततमैर्दूरमालिङ्ग्य नीताः RāghPāṇ.(Ka.) 13. 15; इत्याशास्य पुरीवृद्धा भ्रमयामासुरञ्चलम् PāṇḍaC. 7. 634; लग्नः सुतोऽञ्चलेऽमुष्यास्तारतारस्वरं रुदन् MalliC. 1. 392; चलितायां सुतारायां रोहिताश्वोऽञ्चलेऽलगत् PārśvC. 3. 800; प्रिये गृहाणास्मच्छरीरम् ( इत्यञ्चले धारयति ) DhūrtaSa. 85. 15; उत्सुकापि सुतरां जलकेलावञ्चले प्रणयिना विधृतापि HammīMaKā. 6. 15; परिमृज्याञ्चलेनास्रं बभाषे गद्गदस्वना । पद्माक्षी BallāC. 27. 12; अकरुण मृषाभाषासिन्धो विमुञ्च ममाञ्चलम् BhāmiVi. 2. 20; नतभ्र(? भ्रू)राच्छाद्य वक्षःस्थलमञ्चलेन । उत्तारयन्ती निबिडं निचोलं मनोभवस्यापि मनो मिनोति PadyaVe. 310; Vaija. 169. 131; (man's garment) हरः ··· द्वितीयकौपीनचलाञ्चलेनाहरन्मुखेन्दोरकलङ्किनोऽस्याः KumāSaṁ. 9. 19; अङ्गदेशमनयद्विधूय च स्रस्तरातिसृतमञ्चलं त्वचः ( अग्रजन्मनः लक्ष्मणः ) RāmC. 2. 46; उत्तरीयदुकूलाञ्चलपिहितबिम्बिना YaśasCam. i. 316. 4; रुद्रसोमा ··· भ्रमयन्त्यञ्चलं तस्य निजगाद प्रसादभाक् PariPar. 13. 36; वीज्यमानोऽञ्चलैः कैश्चित् ( विशामीशः ) TrisaS'aPuC. i. 4. 636; कुन्तीसुतस्य सानन्दमुदहारयदञ्चलम् PāṇḍaC. 7. 324; तरुमूलसमासीनां भीमजां निरवापयत् । स्वकीयपरिधानस्य चालयन्नञ्चलं नलः MalliC. 6. 154; स प्राह गुटिका क्वास्ति सोऽवोचत ममाञ्चले SamarāSaṁ. 6. 115; रतिपालं जगादैष विस्तार्याग्रे निचोऽञ्चलम् HammīMaKā. 13. 73; RājTa.(S'rī.) 3. 235; KathāK. 7. 10; VasaTi. 41. 16; (general) प्राच्यादञ्चलात्प्रभृति प्रतीचीनमञ्चलं यावद् विविञ्चन्नसौ तन्तुसंततिमेव केवलामुपलभते NyāyMañ. ii. 114. 19; AbhidhāCin. 667; S'abdaRa.(Vā.) 1767; Liṅgānu.(Para.) (158) 3752; **1ii** edge, end, corner तावदेव कृतिनामपि स्फुरत्येष निर्मलविवेकदीपकः । यावदेव कुरङ्गचक्षुषां ताड्यते चटुललोचनाञ्चलैः S'atTrayī. 77; यदि चलाञ्चले लोचने किमुत्पलकदम्बकैः MahāvīC. 6. 9; ये ( राजानः ) ··· वंशे मनोर्जज्ञिरे । तेषामञ्चलमेष ते दशरथः AnargharRā. 1. 51; पुरन्दरपुरपताकाञ्चलचुम्बनोचितमण्डले YaśasCam. i. 243. 9; ज्योत्स्ना सितस्याञ्चलः SaraKanthā. 166. 25; तमल्पशेषमपि कल्पप्रमाणं मन्यमानोऽञ्चलं रात्रेः UdayKa. 11. 8; यत्सद्यः पुटभेदसालसलसत्पक्ष्माञ्चले चक्षुषी EI. viii. 113. 65; अञ्चलं नयनयोराधाय राधानने GītaGo. 7. 10; वैदग्ध्यसिद्धिं विदधातु देवी कवीन्द्रजिह्वाञ्चलनर्तकी वः S'rīKaC. 1. 35; अभजत नभःपश्चाद्भागं विधुर्विधुरच्छविर्हरिहयहरित्यावि: किंचिद्बभूव दिवाञ्चलः Suratho. 6. 114; नखानामञ्चलैर्भूमिलेखनं चैवमादयः RasāSu. 173. 6 (2. 66); इत्युक्तः सविवेन रागकणिकामीषद्दृशोरञ्चले बिभ्राणः···प्राग्रेसरो भूभुजाम् Acyutarā. 4. 58; ख्यातचोळसमुद्राख्यग्रामसीमाञ्चलस्थितात् EI. xi. 335. 139; xi. 335. 145; ix. 337. 141; नयनाञ्चलावमर्शं या न कदाचित् पुरा सेहे BhāmiVi. 2. 48; माध्वीलिह्वा विरुरुचे मलिनीकृताग्रा कान्तारसीम्नि नवकेतकबर्हरेखा । दग्धाञ्चले सारभिया दयिताजनेन संप्रेषिता पथिकभर्तृषु पत्रिकेव BhārCam. 3. 55; स्वस्वकार्यव्यापृतप्रश्रितससंभ्रमपरिजनैरञ्चलकलिताष्टापदरेखिकायां चतुरन्तपीठिकायाम् ··· निर्वर्तिताभिषेकः ĀnandaRa. 8. 0 (13); **2** name of a Gaṇa of Jain monks श्रीअञ्चलगणाती(? धी)शा आर्यरक्षितसूरयः EI. ii. 64. 5; श्रीअञ्चलगणाधीश्वरभट्टारक ··· श्रीकल्याणसागरसूरीश्वरैः सार्धम् ··· श्रीशत्रुंजयगिरिशिरःप्रासादे ··· सन्ति बिम्बानि स्थापितानि EI. ii. 66. 27; ii. 67. 2.

**अञ्चलकर्मन्** (añcala-karman) *n.* embroidering the end of a garment सुवर्णमण्डितम् अन्तकर्म - अञ्चलकर्म वानलक्षणं येषां तानि AupaSūṬ. 105. 3.

**अञ्चलग्रन्थि** ( añcala-granthi ) *m.* knot at the end of the garment तत एवाम्बुमध्याच्च वस्त्रं चौरनिवेशितम् । प्राप्तवानञ्चलग्रन्थिबद्धहारमशङ्कितम् KathāSaSāg. ii. 2. 167.

**अञ्चलग्राह** ( añcala-grāha ) *m.* seizing the end of the garment कण्ठकेशाञ्चलग्राहः कर्णनासाकरादिषु । एकस्थानासनाहाराः संग्रहो नवधा स्मृतः KātySm. 829.

**अञ्चलग्राहिन्** ( añcalagrāh-in ) *adj.* who seizes the end of the garment यूनः कण्टकविटपानिवाञ्चलग्राहिणस्त्यजन्ती सा ĀryāSaS'a. 460.

**अञ्चलतः** ( añcala-tas ) *adv.* from the end of the garment इति तासामञ्चलतः कुसुमान्यादाय कृष्णोपकण्ठं विकिरति CaitaCa. 79. 14.

**अञ्चलता** ( añcala-tā ) *f.* the nature of forming the end (of a series) सगरः···श्रीरामोऽपि युधिष्ठिरः···शत्रुञ्जयोद्धारिणस्तेषामञ्चलतामियेष सुकृती यः VasaViKā. 14. 23.

**अञ्चलदल** ( añcala-dala ) *n.* tip of the end of the garment ददाति दयया चान्नं पयः पाययते तु यः । तस्याञ्चलदलैर्लग्नो मारिः प्रसरितः क्षितौ KathāK. 124. 8.

**अञ्चलन्यस्त** ( añcala-nyasta ) *adj.* placed in the end-portion of the garment दिनकरबिम्बेन चुम्बितप्रान्तमञ्चलन्यस्तधातुमुद्रास्तबकमिवाम्बरमराजत TilaMañ. 350. 10.

**अञ्चलपिहितमुख** ( añcalapihita-mukha ) *adj.* with the face covered with the end of the garment शून्यालयः ··· अञ्चलपिहितमुखो रोदिति ĀryāSaS'a. 504.

**अञ्चलमोक्षण** ( añcala-mokṣaṇa ) *n.* untying the end of the garment सद्वैव पाणिमोक्षेण तेषामञ्चलमोक्षणम् । ··· कारयामास वासवः TrisaS'aPuC. i. 2. 872; यौतके सावधाना च कृतिन्यञ्चलमोक्षणे । ··· अपत्योद्वाहकल्याणसुखमित्याप धारिणी PariPar. 2. 156.

**अञ्चलव्यजन** ( añcala-vyajana ) *n.* fanning with the end of the garment अञ्चलव्यजनैश्चक्रे भीमं प्रगुणमर्जुनः PāṇḍaC. 7. 311.

**अञ्चलव्यतिकर** ( añcala-vyatikara ) *m.* removing the end of the garment प्रियसंनिधौ···अवयवावरणं च यदञ्चलव्यतिकरेण तदङ्गसमर्पणम् SubhāRaK. 17. 38 = SaduktiKa. 73. 9.

**अञ्चलाकर्ष** ( añcalākarṣa ) *m.* dragging the end of the garment संध्यायामञ्चलाकर्षैः स्वल्पभाटीमयाचत SamaMā. 2. 57.

**अञ्चलादिक** ( añcalādika ) *adj.* *añcala* and other (*mantras*) अनन्ययाजिनो विप्रा मन्त्रसङ्के ऽञ्चलादिके PauṣkS. 27. 711.

**अञ्चलान्तरित** ( añcalāntarita ) *adj.* hidden behind the end of the garment अञ्चलान्तरितगुर्जराङ्गनाकुङ्कुमारुणकुचप्रभाधरम् ··· भानुमन्तम् ··· आश्रये PadyaVe. 49.

**अञ्चलावलम्बिन्** ( añcalāvalambin ) *adj.* clinging to the end of the garment अञ्चलावलम्बिनो वल्लभस्य प्रसभमभिहननम् ··· विप्रलम्भपरिपोषकम् Kāvyānu.(He.) 138. 13.

**अञ्चलि** ( añcali ) *f.* end-part बहिर्वासोऽञ्चल्यामवकरचयं शोधनिकया समाहृत्यापूर्य CaitaCa. 252. 15.

**अञ्चलोत्तारण** ( añcalottāraṇa ) *n.* removing the end of the garment अञ्चलोत्तारणैर्वृद्धास्तरुण्यस्त्ववगूहनैः । तस्य प्रचक्रिरे घोषयोषितः पारितोषिकम् PāṇḍaC. 2. 284; 14. 300.

**अञ्चलोदेजय** ( añcalodejaya ) *adj.* tossing the end of the garment अञ्चलोदेजयैः स्त्रैणैरक्षतामत्रधारयैः।···उपस्थितम् DvyāśraKā. 11. 31.

**अञ्चित** ( añc-ita ) *adj.* [*f.* -ā] [Debru. p. 555; 570; P. vi. 4. 30; vii. 2. 53] **1 A** bent, curved, arched **B** inclined towards, marked by, mixed with **C** contracted, closed **2** suffused with, packed with, covered with **3** attained, obtained, held **4A** honoured, worshipped **B** beautified, charming, graceful **5** adorned, decorated, applied **1A** bent, curved, arched अञ्चितौ बाहुशिरसि हस्तस्त्वभिमुखाङ्गुलिः। निकुञ्चितार्धयोगेन भवेदर्धनिकुट्टकम् NāṭyaS'a. 4. 70; व्यूह्य स्थितः किंचिदिवोत्तरार्धमुन्नद्धचूडोऽञ्चितसव्यजानुः RaghuVa. 18. 51; मय्यभिमुखीभूय तिष्ठति तत्प्रथमावतीर्णकन्दर्पकान्तिकटाक्षदृष्टिस्तदनुमार्गविलासितलीलाञ्चितभ्रूलता ··· पर्यङ्कीडत राजकन्या DaśKuC. 104. 14; 121. 13; दष्टाधरसंभ्रमभ्रान्तमुग्धलोचनमञ्चितकररुहलिख्यमानकपोलविह्वलाननव्यञ्जितस्तनितकूजितम् ··· सुरतमाचचार AvantiKa. 35. 11; अधिज्यचापः स्थिरबाहुमुष्टिरुदञ्चिताक्षोऽञ्चितदक्षिणोरुः Bhaṭṭi. 2. 31; उच्चैरञ्चितलाङ्गूलः ··· दधद्विलुभितं वातैः केशरं वह्निपिङ्गलम् ( कपिः बभञ्ज ) Bhaṭṭi. 9. 40; दोर्लीलाञ्चितचन्द्रशेखरधनुर्दण्डावभङ्गोद्यतष्टङ्कारध्वनिः ··· कथमहो नाद्यापि विश्राम्यति MahāvīC. 1. 54; आत्तं वन्दितमञ्चितञ्च सहसा भग्नं च तादृग्धनुः AnargharRā. 4. 13; वामं पद्मासनं पादं दक्षिणं किंचिदञ्चितम् ··· लिखेत् Mānaso. iii. 1. 742; iii. 1. 772; प्रयोगानुकृतौ चारी प्रसारे चासकृत्सकृत् । ऊर्ध्वमग्रतलं भूमौ पार्ष्णिरङ्गुलयोऽञ्चिताः NṛttaRa. 2. 327; **1B** inclined towards, marked by, mixed with रे रे चञ्चललोचनाञ्चितरुचे चेतः प्रमुच्य स्थिरप्रेमाणं बहुमानमेणनयनामालोक्य किं नृत्यसि S'atTrayī. 720; कस्तूरीतिलकेन ··· अञ्चिता चिह्निता LalitāTriBh. 228. 4 (*on* 28); तत्कालं मदनफलरसभावनयाञ्चितम् । ··· वररुचेरर्पयामास पङ्कजम् PariPar. 8. 103; मुनिमण्डली ··· रुद्ध्वा नेत्रपुटीं पटीं विदधती चीराञ्चलैरञ्चिताम् GopāKeCan. 67. 6; फाणिताञ्चितपयःसहोदरे गद्यपद्यमयकाव्यगुम्फने । चापलम् ··· मे रसज्ञया ··· अनुभूयते YātrāPra. 1. 10; अथ वेदशिरोनिष्ठानपि ··· सत्याञ्चितेक्षणान् ··· प्रणम्य YātrāPra. 3. 50; **1C** contracted, closed सीत्काराञ्चितलोचना सरभसं यैश्चुम्बिता